!! श्री दुर्गायै नमः !!

दुर्गा-शारदीया पूजा-पद्धतिः

आसन शुद्धि

यज्ञकर्ता को चाहिए कि स्नान कर शुद्ध वस्त्र धारण करके आचार्य के आदेशानुसार पूर्वादिक या उत्तरादिक मुख करके आसन पर बैठें। तब आसन के नीचे पूर्वादिक भाग में त्रिकोण मण्डल बनाकर निम्नांकित मंत्र द्वारा गन्ध, पुष्पादि से पूजन करें-

ॐ ह्रीं आधारशक्तये नमः । ॐ कुमार्यै नमः । ॐ अनन्ताय नमः । ॐ पृथिव्यै नमः ।

पूजनोपरान्त त्रिकोण को नीचे लिखे मंत्र द्वारा स्पर्श करें-

भूमि स्पर्श

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।।

आचमन विधि

पुण्य कार्य के आरम्भ में आचमन अवश्य करना चाहिए। आचमन के समय जल का नख से स्पर्श तथा ओष्ठ का शब्द नहीं होना चाहिए। प्रथम आचमन से आध्यात्मिक, दूसरे से आधिभौतिक और तीसरे से आधिदैविक शान्ति होती है। इसलिए तीन बार आचमन करें-

ॐ केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः । तत्पश्चात् **ॐ हृषीकेशाय नमः !**

बोलकर दूसरे पात्र के जल से हाथ की शुद्धि करें।

गणपतिपूजनम्

प्रथम यज्ञकर्ता हाथ में पुष्प, अक्षत, कुश, द्रव्य, पुंगीफल एवं जल लेकर संकल्प करें ।

संकल्प- ॐ तत्सत् आश्विने मासे शुक्लपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रोत्पन्नो अहं अमुकशर्मा (वर्मा प्रसाद गुप्त) श्रीभगवती दुर्गाप्रीतिकामस्य कर्ता तथा वार्षिक-शरत्कालीन-श्रीभगवती दुर्गा निर्विघ्नशान्ति-सिध्यर्थकगणपतिपूजनं अहं करिष्ये ।

प्रतिष्ठा की हुई मूर्ति हो तो केवल पुष्प छोड़ देवें । यदि प्रतिष्ठा की हुई न हो तो पुंगीफल के ऊपर मौली लपेट कर चावल के ऊपर स्थापित करें । (बहुत जगह गोबर और मिट्टी के गौरी-गणेश बनाये जाते हैं) दाहिने हाथ में अक्षत और पुष्प लेकर नीचे लिखे मन्त्र द्वारा आवाहन करके गणेश जी का ध्यान करते हुए मूर्ति के ऊपर अक्षत छोड़ दें ।

ध्यान- गजाननं भूतगणादिसेवितं, कपित्थ- जम्बूफलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं, नमामि विघ्नेश्वर-पादपंकजम् ।।

आवाहन- आगच्छ भगवन्देव स्थाने चात्र स्थिरो भव।
यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव ।।

प्रतिष्ठा- अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै मामिहेति च कश्चन ।।

आसन- रम्यं शुभोभनं दिव्यं सर्वसौख्यकरं शुभम् ।
आसनञ्च मया दत्तं गृहाण परमेश्वर ।।

पाद्य - उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम् ।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ।।

अर्घ्य- अर्घ्यं गृहाण देवेश गन्ध-पुष्पाक्षतैः सह ।
करुणां कुरु मे देव गृहाणार्घ्य नमोऽस्तु ते ।।

आचमन- सर्वतीर्थं समायुक्तं सुगन्धि निर्मलं जलम् ।
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर ।।

मधुपर्क- कांस्ये कांस्येन पिहितो दधिमध्वाज्यसंयुतः ।
मधुपर्को मयानीतः पूजार्थं प्रतिगृह्यताम् ।।

आचमन- सर्वतीर्थं समायुक्तं सुगन्धि निर्मलं जलम् ।
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर ।।

स्नान- गंगा सरस्वती रेवा पयोष्णी नर्मदाजलैः ।
स्नापितोऽसि मया देव तथा शातिं कुरुष्व मे ।।

वस्त्र- सर्वभूषाधिके सौख्ये लोकलज्जानिवारणे ।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ।।

चन्दन- श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ।।

रोली- कुंकुमं कामना दिव्यं कामना कामसम्भवम् ।
कुंकुमेनार्चितो देव गृहाण परमेश्वर ।।

पुष्प- पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः ।
पूजार्थं नीयते तुभ्यं पुष्पाणि प्रतिगृह्यताम् ।।

पुष्पमाला- माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयानीतानि पुष्पाणि गृहाण परमेश्वर ।।

बिल्वपत्र- त्रिशाखैर्विल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः ।
तव पूजां करिष्यामि गृहाण परमेश्वर ।

दूर्वा - त्वं दूर्वे अमृतजन्मासि वन्दितासि सुरैरपि ।
सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव ।।

सिन्दूर- सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्द्धनम् ।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम् ।।

अबीरगुलाल-अबीरं च गुलालं च चोवाचन्दनमेव च ।
अबीरेणार्चितो दव अतः शान्तिं प्रयच्छ मे ।।

धूप- वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।।

दीप- आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ।।

नैवेद्य- शर्करा धृतसंयुक्तं मधुरं स्वादु चोत्तमम् ।
उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ।।

आचमन- गङ्गजलं समानीतं सुवर्णकलशे स्थितम् ।
आचम्यतां सुरश्रेष्ठ शुद्धमाचमनीयकम् ।।

दक्षिण- हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

प्रार्थना- रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ।
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ।

कलश-स्थापनम्

कलश-स्थापन के स्थान में पूजन के पहिले गंधादि से अष्टदल कमल बनाकर उस पर कलश स्थापित करना चाहिए ।

भूमिस्पर्श- विश्वाधारासि धरणी शेषनागोपरि स्थिता ।
धृता चादिवराहेण सर्वकामफलप्रदा ।।

कलशस्पर्श- हेमरूपादि सम्भूतं ताम्रजं सुदृढ़ नवम् ।
कलशं धौतकल्माषं छिद्रवर्णविवर्जितम् ।।

कलश में जल- जीवनं सर्वजीवानां पावनं पावनात्मकम् ।
बीजं सर्वौषधीनां च तज्जलं पूरयाम्यहम् ।।

सूत्र लपेटें- सूत्रं कार्पाससम्भूतं ब्रह्मणा निर्मितं पुरा ।
येन बद्धं जगत्सर्वं वेष्टनं कलशस्य च ।।

क०औषधि- ओषधिः सर्ववृक्षाणां तृणगुल्मलतास्तथा ।
दूर्वासर्षपसंयुक्ता सर्वौषध्यः पुनातु माम् ।।

क०पुष्प- विविधपुष्पसंजातं देवानां प्रीतिवर्धनम् ।
क्षिप्तं यत्कार्यसम्भूतं कलशे निक्षिपाम्यहम् ।।

क०पञ्च-पल्ल०- अश्वत्थोदुम्बरप्लक्षन्यग्रोधपल्लवास्तथा ।
पञ्च ते पल्लवाः प्रोक्ताः कलशे निक्षिपाम्यहम् ।।

पंचरत्न - कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् ।
एतानि पञ्चरत्नानि कलशे प्रक्षिपाम्यहम् ।।

पूंगीफल - पूंगीफलमिदं दिव्य पवित्रं पापशोधनम् ।
पुत्रसौख्यादिफलदं कलशे निक्षिपाम्यहम् ।।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
हिरण्य०- अनन्तपुण्यफलदं कलशे प्रक्षिपाम्यहम् ।।

सप्तमृतिका- अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमात् ह्रदात् ।
राजद्वाराच्च गोगोष्ठाद् मृदमानीय निक्षिपेत् ।।

पूर्णपात्र- विधानं सर्ववस्तूनां सर्वकार्यार्थसाधनम् ।
पूर्णस्तु कलशो येन पात्रं तत्कलशोपरि ।।

नारियल में लाल वस्त्र लपेट कर पूर्णपात्र पर रखें ।

श्रीफल-श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण । सर्वलोकं म इषाण ।

वरूण आवाहन-अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि । ॐ भूर्भुवः स्वः भो वरुण इहागच्छ इह तिष्ठ । स्थापयामि पूजयामि।

देवावाहन- सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ।।
कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ।
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः ।
अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ।।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ।।

यज्ञकर्ता को चाहिए कि कलशाधिष्ठित आवाहित देवताओं को पंचोपचार या षोड़शोपचार से पूजा करें ।

प्रार्थना- देवदानव - संवादे मथ्यमाने महादधौ ।
उत्पन्नोऽसि यदा कुम्भ ! विधृतो विष्णुना स्वयम्।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः।।
शिवः स्वयं त्वमोवाऽसि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ।।
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ।।
सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।

प्रसन्नो भव । वरदो भव । अनया पूजया वरुणाद्यावाहितदेवताः प्रीयन्तां न मम ।

नवग्रहपूजनम्

कई स्थानों में वेदी बनाकर पूजा की जाती है । वेदी पर नव कोष्ठ बना कर मध्य में सूर्य की पूजा करें, सूर्य के दक्षिण भाग में मङ्गल (सूर्य व मङ्गल लाल), अग्निकोण में चन्द्रमा (श्वेत), ईशान कोण में बुध (हरा), उत्तर में गुरु (पीत), पूरब में शुक्र (श्वेत), सूर्य के पश्चिम में शनि (काला), नैऋत्य कोण में राहु (काला), वायव्य कोण में केतु (काला), ग्रह के अनुसार वेदी का निर्माण करें छोटी तथा ध्वजा गाड़ दें । जहाँ वेदी न बनी हो तो यज्ञकर्ता को चाहिए कि कलश के अग्रभाग में आम्र पल्लव पर थोड़ा-थोड़ा अक्षत गिरावें । आचार्य निम्नांकित मन्त्र पढ़ते रहें-

ॐ आं आदित्याय नमः । ॐ चं चन्द्राय नमः ।
ॐ मं मङ्गलाय नमः । ॐ बुं बुधाय नमः ।
ॐ बृं बृहस्पतये नमः । ॐ शुं शुक्राय नमः ।
ॐ शं शनैश्चराय नमः । ॐ कें केतवे नमः ।
ॐ रां राहवे नमः । पंचोपचार से पूजा करें ।

पंचोपचार या दशोपचार से पूजा करें–

प्रार्थना

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतोबुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शान्तिकरा भवन्तु।।

पंचलोकपालपूजनम्

गणेश- गजाननम्भूतगणादिसेवित् इत्यादि ।

सूर्य- ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च।
हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ।।

विष्णु- ॐ तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवि च चक्षुराततम् ।

शिव- ॐ त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ।।

दुर्गा- ॐ मनसः काममाकूतिं वाचः सत्यमशी महि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ।

पंचोपचार से पूजा करें ।

दशदिक्पालपूजनम्

जहाँ सर्वतोभद्र वेदी बनी हो, वहाँ वेदी पर ही पूजा करें । वेदी नहीं हो तो कलश के अग्रभाग में आम्र पल्लव पर पूजा करें, नीचे लिखे मन्त्र से–

ॐ इं इन्द्राय सपरिवाराय नमः । ॐ दं दहने सपरिवाराय नमः । ॐ यं यमाय सपरिवाराय नमः । ॐ नैं नैंऋत्ये सपरिवाराय नमः । ॐ वं वरुणाय सपरिवाराय नमः । ॐ वां वायवे सपरवाराय नमः । ॐ कुं कुबेराय सपरिवाराय नमः । ॐ ईं ईशानाय सपरिवाराय नमः । ॐ बं ब्रह्मणे सपरिवाराय नमः । ॐ अं अनन्ताय सपरिवाराय नमः। पंचोपचार से पूजा करें ।

नीचे लिखे मन्त्र से पुष्प और अक्षत छोड़ें–

मन्त्र – अनया पूजया दशदिक्पालदेवताः प्रीयन्ताम् ।
प्रसन्ना भवन्तु वरदा भवन्तु कल्याणमस्तु ।।

अथन्यासाः

अथ जीवन्यासः

ॐ सोऽहमिति पठित्वा हृदि हस्तं दत्वा, ॐ आं, ह्रीं क्रीं, यं, रं, लं, वं, शं, षं, सं, हं, हंसः, मम प्राणा इह प्राणाः, ॐ मम जीव इह स्थितः, पुनः ॐ आं० सर्व-इन्द्रियाणि, पुनः ॐ मम वाङ्मनश्चक्षुश्रोत्रघ्राण प्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।

अथ करन्यासः

ॐ, अं, कं, खं, गं, घं, ङं, आं अंगुष्ठाभ्यां नमः। ॐ इं, चं, छं, जं, झं, ञं, ईं तर्जनीभ्यां नमः । ॐ उं, टं, ठं, डं, ढं, णं मध्यमाभ्यां नमः । ॐ एं, तं, थं, दं, धं, नं, ऐं अनामिकाभ्यां नमः । ॐ ओं, पं, फं, बं, भं, मं, औं कनिष्ठिकाभ्यां नमः । ॐ अं, यं, रं, लं, वं, शं, षं, सं, हं, लं, क्षं, अः करतलकरपृष्ठाभ्याम् अस्त्राय फट् ।

अथ अङ्गन्यासः

ॐ अं, कं, खं, गं, घं, ङं, आं हृदयाय नमः । ॐ इं, चं, छं, जं, झं, ञं, ईं शिरसे स्वाहा । ॐ उं, टं, ठं, डं, ढं, णं, ऊं शिखायै वषट् । ॐ ऐं, तं, थं, दं, धं, नं, ऐं कवचाय हुम् । ॐ ओं, पं, फं, बं, भं, मं, औं नेत्रत्रयाय वौषट् । ॐ अं, यं, रं, लं, वं, शं, षं, सं, हं, क्षं, अः करतलकरपृष्ठाभ्यां अस्त्राय फट् । करतल ध्वनि करें ।

अथ मातृकान्यासः

आधारे वं नमः । शं नमः । वं नमः । सं नमः । लिङ्गे बं नमः । भं नमः । मं नमः । यं नमः । रं नमः। लं नमः । नाभौ डं नमः । ढं नमः । णं नमः । तं नमः। थं नमः । दं नमः । धं नमः । नं नमः । पं नमः। फं नमः । हृदये कं नमः । खं नमः । गं नमः ।

घ नमः। ङ नमः । च नमः । छ नमः । ज नमः । झं नमः। ञं नमः । टं नमः । ठं नमः । कण्ठे अं नमः। इं नमः । ईं नमः । उं नमः । ऊं नमः । ऋं नमः । ॠं नमः । लृं नमः । लॄं नमः । एं नमः । ऐं नमः । ओं नमः । औं नमः । ललाटे ।

करन्यासः

ॐ दुर्गे अंगुष्ठाभ्यां नमः । दुर्गे तर्जनीभ्यां स्वाहा। दुर्गायै मध्यमाभ्यां वषट् । भूतरक्षिणी कनिष्ठिकाभ्यां वौषट् । ॐ दुर्गे दुर्गे रक्षिणी करतलकरपृष्ठाभ्यां अस्त्राय फट् ।

अथ प्राणायामविधिः

यज्ञकर्ता पद्मासन करके भगवती को ध्यान करते हुए मौन होकर नेत्र को बन्द कर तीन बार प्राणायाम करें ।

(१) पूरक प्राणायाम-नासिका के दाहिने छिद्र को अँगूठे से दबाकर बायें छिद्र से श्वास खींचते हुए नीलकमल के सदृश श्यामवर्ण चतुर्भुजी भवगती का अपनी नाभि में ध्यान करें ।

(२) कुम्भक प्राणायाम-उक्त छिद्र को दबाये हुए नासिका के बायें छिद्र को कनिष्ठा और अनामिका अँगुलियों से दबा करके श्वास को रोक कर कमल के आसन पर बैठे हुए रक्तवर्ण चतुर्मुखी भगवती का ध्यान करें ।

(३) रेचक प्राणायाम- श्वेतवर्ण त्रिनेत्रा भगवती का अपने ललाट में ध्यान करते हुए नासिका के दाहिने छिद्र को खोलकर धीरे-धीरे श्वास छोड़ें । (गृहस्थ तथा बानप्रस्थी पाँचों अँगुलियों से नासिकाको दबाकर भी प्राणायाम कर सकते हैं ।)

प्राणायाम मंत्र

(ह्रीं) पूजा प्राणायाम में चौंसठ बार मन्त्र को पढ़ें। कुम्भक प्राणायाम में चौंसठ बार तथा रेचक प्राणायाम में बत्तीस बार उच्चारण करें।

हृदये- ॐ आधारशक्त्यै नमः। ॐ प्रकृत्यै नमः। ॐ कुमार्यै नमः। ॐ अनन्ताय नमः। ॐ पृथिव्यै नमः। ॐ क्षीरसमुद्राय नमः। ॐ रतिद्वीपाय नमः। ॐ मणि-मण्डलाय नमः। दक्षिणस्कन्धे-ॐ धर्माय नमः। वाम-स्कन्धे- ॐ ज्ञानाय नमः। दक्षिण ऊरूमूले-ॐ वैराग्याय नमः। वामोरूमूले-ॐ ऐश्वर्याय नमः। मुखे-ॐ धर्माय नमः। दक्षिणापार्श्वे-अज्ञानाय नमः। वामपार्श्वे-ॐ अवैराग्याय नमः। नाभौ-ॐ अनैश्वर्याय नमः। पुनः हृदये-ॐ शेषाय नमः। ॐ पद्माय नमः। ॐ सूर्यमण्डलाय द्वादशकलात्मने नमः। ॐ सोममण्डलाय षोडशकलात्मने नमः। वं वह्निमण्डलाय द्वादशकलात्मने नमः। ॐ सं सत्त्वाय नमः। रं रजसे नमः। तं तमसे नमः। आं आत्मने नमः। पं पापात्मने नमः। **ह्रीं ज्ञानात्मने नमः।**

अथ पीठशक्ति न्यास

हृत्पद्मस्य पूर्वादिकेशरेषु आं प्रभायै नमः। ईं मायायै नमः। ॐ गङ्गायै नमः। एं सूक्ष्मायै नमः। ऐं विशुद्धायै नमः। ॐ नन्दिन्यै नमः। ॐ सुप्रभायै नमः। ॐ विजयायै नमः। ॐ सर्वसिद्धिदायिन्यै नमः। मध्ये-ॐ वज्रनखदंष्ट्रायुधाय महासिंहाय ॐ हूँ फट् नमः।

अथ व्यापकन्यासः

(ह्रीं) यह मन्त्र कहते हुए शिर से पैर तक तीन बार अंग स्पर्श करें ।

अथ अर्घस्थापनम्

ॐ अस्त्राय फट्–यह मन्त्र कहकर शंख प्रक्षालन करें । तब बाम भाग में त्रिकोणमण्डल बनाकर साधारण शंख उस पर स्थापित करें । ॐ नमः–यह मन्त्र कहकर गन्ध, पुष्प, अक्षत शंख में दें और निम्नांकित मन्त्र से शंख में थोड़ा–थोड़ा जल देते रहें ।

ॐ छं नमः । ॐ प्रणवं मन्त्रादौ सर्वत्र उच्चारयेत् । लं नमः । हं नमः । सं नमः । षं नमः । शं नमः । वं नमः । लं नमः । रं नमः । यं नमः । मं नमः । भं नमः। बं नमः। फं नमः । पं नमः । नं नमः । धं नमः । दं नमः। थं नमः । तं नमः । णं नमः । ढं नमः । डं नमः । ठं नमः । टं नमः । ञं नमः । झं नमः । जं नमः । छं नमः। चं नमः । ङं नमः । घं नमः । गं नमः । खं नमः । कं नमः । अं नमः । औं नमः । ओं नमः । ऐं नमः । एं नमः । ॡं नमः । ॢं नमः । ॠं नमः । ऋं नमः । ऊं नमः । उं नमः । ईं नमः । इं नमः । आं नमः । अं नमः । ह्रीं नमः । श्रीदुर्गायै नमः ।

मदंस-कलात्मने वह्निमण्डलाय नमः, इत्याधार-अधोदेशकलात्मने - सूर्यमण्डलाय नमः, इति शंखषोडश - कलात्मने चन्द्रमण्डलाय नमः ।

शंख की पंचोपचार से पूजा करें । तब हाथ में पुष्प लेकर प्रार्थना करें ।

प्रार्थना

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
निर्मितः सर्वदवैश्च पाञ्चजन्य नमोऽस्तु ते ।।

दुर्गा आवाहनम्

ॐ गंगे चेत्यादिना कुशमुद्रया सूर्य्यमण्डले तीर्थमारुह्य दुर्गे इहागच्छ इह तिष्ठ अत्राधिष्ठानं कुरु मम पूजां गृहाण इति स्वहृदयदेवता तत्रावाह्य हुमिति तर्जनीभ्यां अवगुण्ठ्य, वौषडिति गालिनीमुद्रां प्रदर्श्य बौषडिति तज्जलं वीक्ष्य ॐ ह्रीं श्रीं जय दुर्गायै नमः । इति मन्त्रेण सकलीकृत्य ॐ ह्रीं दुर्गे हृदयाय नमः । ॐ दुर्गे शिरसि स्वाहा । ॐ दुर्गायै शिखायै वषट् । ॐ भूतरक्षिणी कवचाय हुम् । ॐ दुर्गे-दुर्गे रक्षिणी नेत्रत्रयाय वौषट् । ॐ दुर्गे दुर्गे रक्षिणी अस्त्राय फट् । इति पडङ्गानि विन्यस्य दुर्गारूपजलं ध्यात्वा तत्र गन्धपुष्पाभ्यां दुर्गां संपूज्य ।

गन्ध-पुष्पादि से दुर्गा जी का पूजन करें ।

मूल मन्त्र जपें- ॐ ऐं ह्रीं क्लीं चामुण्डायै नमः ।

१०८ बार जप करें ।

अर्घ से दक्षिण भाग में आचमनी पात्र स्थापित करें।

ॐ फट्-यह मन्त्र कह करके आचमनी पात्र में जल, गन्ध, पुष्पादि दें । गंगा तीर्थ आदि का आवाहन करें । पाद्य, अर्घ्य से उत्तर तरफ आचमनी पात्र स्थापित करें । पुष्पांजलि देवें ।

ॐ आधारशक्त्यै नमः । ॐ प्रकृत्यै नमः । ॐ कूर्माय नमः । ॐ अनन्ताय नमः । ॐ पृथिव्यै नमः । ॐ क्षीरसमुद्राय नमः । ॐ रत्नदीपाय नमः । ॐ मणिमण्डलाय नमः । ॐ कल्पवृक्षाय नमः । ॐ वेदिकायै नमः । अग्नादि-चतुष्कोणेषु अर्यम्णे नमः । ॐ अज्ञात्मने नमः । ॐ अवैराग्याय नमः । ॐ अनैश्वर्याय नमः । मध्ये ॐ शेषाय नमः । ॐ पद्माय नमः । ॐ सूर्य्याय नमः । ॐ सं सत्वाय नमः । रं रजसे नमः । तं तमसे नमः । अं आत्मने नमः । आं अनन्ताय नमः । पं परमात्मने नमः । ज्ञानाय नमः । केशरेषु अष्टदिक्षु आप्तभायै नमः । ईं पायै नमः । अं ज्यायै नमः । ॐ यक्ष्मायै नमः। ऐं विशुद्धायै नमः । ॐ नन्दिन्यै नमः । ॐ सुप्रभायै नमः । ॐ विजयायै नमः । ॐ सर्वसिद्धिदायिन्यै नमः। मध्ये-ॐ वज्रनखदंष्ट्रायुधाय सिंहाय हुँ फट् स्वाहा । गन्ध-पुष्पादि से पूजन करें ।

पंचोपचार पूजा (जाबाली)

ध्यानमावाहनं चैव भक्त्या पश्च निवेदितम् ।
नीराजनं प्रणामश्च पश्चपूजोपचारकाः ।।

दशोपचार पूजा (ज्ञानमाला)

अर्घ्यपाद्यं चाचमनं स्नानं वस्त्र-निवेदनम् ।
गन्धाढयो नैवेद्यान्ता उपचारा दशक्रमात् ।।

अष्टादशोपचार पूजा (पुरोहित दर्पण)

आसनावाहनं अर्घ्यं पाद्यमाचमनं तथा ।
स्नानं वस्त्रोपवीतं च भूषणानि च सर्वशः ।।
गन्धः पुष्पं तथा धूपो दीपो तत्रापि तर्पणम् ।
माल्यानुलेपनं चैव नमस्कारं विसर्जनम् ।।
अष्टादशोपचारेण मन्त्रैः पूजां समाचरेत् ।
अस्य पूजाविधानेन धनपुत्रान् लभेन्नर : ।।

आसन, आवाहन, अर्घ्य, पाद्य, आचमन, स्नान वस्त्र, उपवीत, आभूषण, चन्दन, पुष्प, धूप, दीप, नैवद्य दर्पण, माला, प्रार्थना, विसर्जन करें । षोड़शोपचार-पूज गणपति-पूजा प्रकरण में देखें ।

अथ षष्ठी-पूजनम्

यज्ञकर्ता को चाहिए कि स्नानादि से निवृत्त होक आचार्य तथा पुरोहित, मित्रादि के साथ सायंकाल विल्व-वृक्ष के नजदीक जाकर स्वस्ति-वाचन तथा संकल्प करे पूज करें अर्थात् विल्वाभिमन्त्रण करें ।

संकल्प– ॐ तत्सत् आश्विने मासे शुक्ले पक्षे षष्ठ्यां तिथौ अमुकगोत्रः–अमुकदेव–(शर्मा वर्मा प्रसाद गुप्तः) अहं श्रीभगवती दुर्गाप्रीतिकामः श्वः कर्तृतया वार्षिक–शरत्–कालीन–श्रीभगवत्याः दुर्गायाः बोधनमन्त्रैः शुभगन्धादिवासनकर्माणि अहं करिष्ये ।

ॐ अस्त्राय फट्–यह मंत्र कहकर करतल ध्वनि करें, और हाथ में पीली सरसों लेकर दिग्बन्धन करें । नीचे लिखे मन्त्रों से दशों दिशाओं में सरसों छींटें–

पूर्व रक्षतु वाराहः आग्नेय्यां गरुडध्वजः ।
दक्षिणे पद्मनाभस्तु नैर्ऋत्यां मधुसूदनः ।।
पश्चिमे चैव गोविन्दो वायव्यां तु जनार्दनः ।
उत्तरे श्रीपतिः रक्षेत् ईशाने तु महेश्वरः ।।
ऊर्ध्वं रक्षतु धाता वो अधोऽनन्तश्च रक्षतु ।
एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः ।।

पृथ्वी पर पीली सरसों छींटें–

अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन पूजाकर्म समारभे ।।

यज्ञकर्ता को चाहिए कि पृथवी में सिन्दूर से तिलक करें । ॐ भूतेभ्यो नमः । यह मंत्र कहकर पंचोपचार से पूजन करें । यज्ञकर्ता हाथ में दही, उड़द (दोनों में) लेकर बलि दें । अगले मंत्र से–

ॐ भूताः प्रेताः पिशाचाश्च ये वसन्त्यत्र भूतले ।
ते गृह्णन्तु मया दत्तो बलिरेषः प्रसाधितः ।।

इसके बाद कलशस्थापन, गणेश, नवग्रह, दिक्पालादि का पूजन करें । तब अंगन्यास करने के बाद कलशोपरि स्थित दुर्गा भगवती का षोड़शोपचार से पूजा कलश पर ही करें ।

विल्ववृक्षपूजनम्

ध्यान-ॐ चतुर्भुजविल्ववृक्षः रजताभ्यां वृषस्थितम् ।
नानालंकारसंयुक्तं जटामण्डलधारिणम् ।।

ॐ विल्ववृक्षाय नमः-यह मन्त्र कहकर पंचोपचार से पूजा करें । इसके बाद देवी का ध्यान करें, हाथ में रक्त पुष्प लेकर-

ध्यान- रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणे बोधो देवास्त्वयि कृतः पुरा ।।
अहमप्याश्विने षष्ठ्यां सवाहनं बोधयामि ।
शक्रेणापि च समबोधत् प्राप्तं राज्यं सुरालये।।
तस्मादहं त्वां प्रतिबोधयामि विभूतिराज्यं प्रतिपत्तिहेतोः ।
यथैव रामेण हतो दशास्यस्तथैव विल्वं प्रतिबोधयामि ।।

अथाधिवासनम्

पश्चात् विल्व वृक्ष के मूल में गन्धादि से पूजन पंचोपचार से करें । हाथ में रक्तपुष्प लेकर प्रार्थना करें-

प्रार्थना

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरी सर्वभूतानां तामिहोपह्वये श्रियम् ।।

इसी तरह नवपत्रिका का ध्यान तथा पूजन करें । इसके बाद वायव्यकोण और नैऋत्य कोण के मध्य में स्थित विल्व-शाखा, जिसमें दो फल लगे हों उस डाली के काटने के स्थान पर तेल, हल्दी तथा सिन्दूर यज्ञकर्ता लगावें । इसके बाद हाथ में पुष्प लेकर वृक्ष की स्तुति करें-

ॐ मेरुमन्दरकैलाश हिमवृक्षोत्तरे गिरौ ।
जातः श्रीफलवृक्ष त्वं अम्बिकायाः सदा प्रियः ।।
श्रीशैलशिखरे जातः श्रीफलं श्रीनिकेतनः ।
न तेभ्योऽसि मया गच्छ पूज्यो दुर्गास्वरूप यः ।।
ॐ श्रीफलोऽसि महाभाग सदा त्वं शंकरप्रियः ।
चण्डिका रोपनार्थाय त्वामहं वरये प्रभो ।।
देवदेव प्रियं शुद्धं श्रीवृक्ष चण्डिकाप्रियम् ।
आमन्त्रयामि पूजार्थं विल्ववृक्ष नमोऽस्तु ते ।

इसके बाद गीत-वाद्यादि से भगवती को सन्तुष्ट करें। आचार्य इष्ट-मित्रादि के सहित दुर्गा की प्रतिमा स्थापित स्थान पर जायँ । पुनः पूर्ववत् कलश-स्थापन करें । यज्ञकर्ता स्वयं अपने हाथ से देवी के बायें हाथ में दुर्बा रक्त सूत में बाँध दें ।

अष्टादशोपचार पूजा प्रारम्भ

आवाहन- आगच्छ वरदे देवि दैत्यदर्पनिषूदिनि ।।
पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ।।

आसन- ॐ आसनं गृहाण चार्वङ्गि चण्डिके परमेश्वरि।
भजस्व जगतां मातः स्थानं में देहि चण्डिके ।।

पाद्य- ॐ पाद्यं गृहाण महादेवि सर्वदुःखापहारकम्।
त्रायस्व वरदे देवि नमस्ते शंकरप्रिये ।।

अर्घ्य- ॐ दूर्वाक्षतसमायुक्तं विल्ववृक्ष तथान्तरम् ।
शोभनं शङ्खपात्रस्थं गृहाणार्घ्यं हरप्रिये ॥

मधुपर्क- ॐ मधुपर्कं महादेवि ब्रह्माण परिकल्पितः ।
मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥

आचमन- आचम्यतां त्वया देवि ! भक्तिं में अचलां कुरु।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥

स्नान- जाह्नवीतोयमानीतं शुभं कर्पूरसंयुतम् ।
स्नापयामि सुरश्रेष्ठे त्वां पुत्रादिफलप्रदाम् ॥

वस्त्र- वस्त्रं च सोमदैवत्यं लज्जायास्तु निवारणम् ।
मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥

उपवस्त्र- ॐ यामाश्रित्य महामाया जगत्सम्मोहिनी सदा।
तस्यै ते परमेशायै कल्पयाम्युत्तरीयकम् ॥

चन्दन- परमानन्द-सौभाग्यं परिपूर्णं दिगन्तरे ।
गृहाण परमं गन्धं कृपया परमेश्वरि ॥

अष्टगंध- गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

पुष्प- मन्दारपारिजातादि पाटलीकेतकानि च ।
जाती-चम्पक-पुष्पाणि गृहाणेमानि शोभने ॥

द्रोण पुष्प- ॐ ब्रह्म-विष्णु-शिवादीनां द्रोणपुष्पं सदा प्रिये।
तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये ॥

विल्वपत्र- अमृतोद्भव-श्रीवृक्ष महादेवप्रियः सदा ।
विल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि ।।

पुष्पमाला- सुरभि-पुष्पनिचयैः ग्रथितां शुभ्रमालिकाम् ।
ददामि तव शोभार्थं गृहाण परमेश्वरि ।।

धूप-दीप दान विधि

दीपं दक्षिणतो दद्यात् धूपतः स्थानवामतः ।
वामतस्तथा धूपमग्र वा न तु दक्षिणे ।।

देवताओं के दक्षिण तरफ दीप स्थापन करना चाहिए । सम्मुख तथा वाम भाग में स्थापन करना निषिद्ध है । धूप वाम भाग में रखें सम्मुख तथा दक्षिण भाग में न रखना चाहिए ।

धूप- दशाङ्गगुग्गुलं धूपं चन्दनागरुसंयुतम् ।
समर्पितं मया भक्त्या महादेवि ! प्रगृह्यताम् ।।

दीप- धृतवर्तिसमायुक्तं महातेजो महोज्ज्वलम् ।
दीपं दास्यामि देवेशि ! सुप्रीता भव सर्वदा ।।

कज्जल- चक्षुर्भ्यां कज्जलं रम्यं सुभगे शान्तिकारिके ।
कर्पूरज्योतिरुत्पन्नं गृहाण परमेश्वरि ।।

नैवैद्य देने का विधान

नैवेद्य- नैवेद्यं दक्षिणे वामे पुरतो वा न पृष्ठतः ।
अस्य पूजा विधानेन धनपुत्रादिं लभेन्नरः ।।

देवताओं के दक्षिण भाग में तथा सम्मुख नैवेद्य देना चाहिए । वाम भाग में नहीं देना चाहिए । नैवेद्य अर्पण करने के बाद पृष्ठ भाग में भी रखना चाहिए ।

पायस(खीर)- ॐ गुडसर्पिः पयो युक्तं नाना मधुरसंयुतम् ।
मया निवेदितं भक्त्या पायसं प्रतिगृह्यताम् ।।

पिष्टिकम्- ॐ अमृतं रचितं दिव्यं नानारूपसमन्वितम् ।
पिष्टिकं विविधं देवि गृहाण मम भावतः ।।

लड्डुकानि-ॐ लड्डुकं मोदकं दिव्यं नानारूपविनिर्मितम्।
समिष्टं परमं देवि तदैतत् प्रतिगृह्यताम् ।।

पुनः आचमनीयम्-जलं समर्पयामि ।

ताम्बूल- एला-लवंग-कस्तूरी-कर्पूरैः पुष्पवासितम् ।
वीटिकां मुखवासार्थमर्पयामि सुरेश्वरि ।।

सिन्दूर- ॐ पतिसौभाग्यजनकं सुरम्यं सूर्यसन्निभम् ।
मया निवेदितं भक्त्या सिन्दूर प्रतिगृह्यताम् ।।

सुगन्धिततैल-चन्दनागरुकर्पूरं कुंकुमं रोचनं तथा ।
कस्तूर्यादि-सुगन्धांश्च सर्वाङ्गेषु विलेपनम् ।

पुष्पाञ्जलि- ॐ चण्डिकायै विद्महे भगवत्यै धीमहि, तन्नो देवि प्रचोदयात् ।

सौभाग्य द्रव्य

सौभाग्यं सुखदं नित्यं सौभाग्यं सुखवर्द्धनम् ।
सौभाग्यं संततिं देहि देवि त्वं शंकरप्रिये ।।

इसके बाद यज्ञकर्ता पूर्ववत् ही मंत्र द्वारा प्राणायाम करें । वह मूल मंत्र तथा शक्ति जपें । पुनः सूर्य को अर्घ्य देवें, इसके बाद प्रार्थना करें ।

अर्घ्य - ॐ नमो भगवते तुभ्यं नमस्ते जातवेदसे ।
ममेदमर्ध्यं गृहाण त्वं देवदेव नमोऽस्तु ते ।।

प्रार्थना

ॐ यज्ञछिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम ।
तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ।।

इसके बाद विष्णु भगवान् का स्मरण करें और नाना प्रकार के वाद्यादि से भगवती को सन्तुष्ट करें ।

अथ सप्तमीपूजनम्

यज्ञकर्ता स्नानादि से निवृत्त होकर शुद्ध वस्त्र धारण कर आचार्य तथा इष्ट-मित्रादि के साथ उसे विल्व वृक्ष के समीप जायँ, जिसके पूर्व विल्व वृक्ष की पूजा की गई थी और पूर्ववत् षोडशोपचार द्वारा देवी का पूजन करें और विल्व वृक्ष का भी पूजन करें । हाथ में पुष्प लेकर प्रार्थना करें-

प्रार्थना

ॐ वृक्षराज महाभाग सदा त्वं शंकरप्रिय ।
गृहीत्वा तव शाखाश्च देवीपूजां करोम्यहम् ।।
शाखाच्छेदोद्भवं दुःखं न च कार्यं त्वया प्रभो ।
देवि गृहीत्वा तच्छाखा पूज्या दुर्गेति विश्रुतिः ।।

ॐ छिन्धि छिन्ध फट् स्वाहा-इस मन्त्र को कहकर छेदनार्थ स्थान पर जहाँ कि सिन्दूर व हल्दी लगायी गयी थी, उस स्थान पर विल्व वृक्ष की शाखा को काट लें । यज्ञकर्ता दाहिने हाथ में काटी हुई शाखा को लेकर निम्नांकित मन्त्र पढ़ें-

ॐ पुत्रायुर्धनवृद्ध्यर्थं नेष्यामि चण्डिकाप्रिय ।
विल्वशाखां समाश्रित्य लक्ष्मिराज प्रयच्छ मे ।।
आगच्छ चण्डिके देवि सर्वकल्याणहेतवे ।
पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये ।।

इसके बाद यज्ञकर्ता नव-पत्रिका, श्वेत अपराजिता पुष्प, हल्दी से रँगा हुआ सूत्र में नवपत्रिका सहित विल्व की शाखा, जो काटी गयी है, उसमें लपेट कर पालकी में रखकर तथा पूर्वस्थापित अम्बिका घट के साथ नदी में ले जायँ । यज्ञकर्ता हाथ में कुश, तिल, पुष्प, अक्षत लेकर आचार्य के कथनानुसार संकल्प करें ।

संकल्प-ॐ तत्सदद्य आश्विपे मासे शुक्ले पक्षे सप्तम्यां तिथौ अमुकगोत्रः श्रीअमुकदेवशर्मा सप्तजन्मार्जितं पापक्षयकामं दुर्गामहं स्नापयेत् ।

ॐ ह्रीं दुर्गायै नमः-यह मंत्र कहकर देवी को पुष्पाञ्जलि दें । विल्व की आठ अँगुली की दतुवन भगवती को निम्नांकित मंत्र द्वारा देवें-

ॐ आयुर्बलं यशोपर्चः प्रजा-पशु-वसूनि च ।
ब्रह्मप्रज्ञां मेधाञ्च तन्मे देहि वनस्पते ।।

पुनः आचमनीय तीन बार उष्ण जल से करावें । इसके बाद तेल, हल्दी भगवती को दें ।

मन्त्र-ॐ नानारूपधरे देवि दिव्यवस्त्रावगुण्ठिके ।
तथा लेननमात्रेण पक्षाघातो विनश्यति ।।

महास्नान प्रारम्भ

नवपत्रिका विल्वशाखा सहित जो पीले सूत्र में बाँधी गयी है, उसको उष्ण जल से तथा निम्नांकित पदार्थों से स्नान करावें –

केला – ॐ कदलीतरूसंस्थासि विष्णुवक्षः स्थलाश्रये ।
नमस्ते नवपत्रि त्वं नमस्ते चण्डिकायने ।।

पेकची – ॐ कश्चि त्वं स्थावरस्थासि सदा सिद्धिप्रदायिनि।
दुर्गारूपेण सर्वत्र स्नानेन विजयं कुरु ।।

हल्दी – ॐ हरिद्रे हर रूपासि शंकरस्य प्रिया सदा ।
रुद्ररूपासि देवि त्वं सर्वशान्ति प्रयच्छ मे ।।

जयन्ती – ॐ जयन्ती जय रूपासि जयतां जयकारिणि।
स्नापयामि च देवि त्वां जयं मे देहि गृह्य माम्।।

विल्व – श्रीफलं श्रीनिकेतोऽसि सदा विजयवर्द्धने ।
देहि मे हितकामञ्च प्रसन्नो भव सर्वदा ।।

अनार – ॐ दाण्डिममथ विनाशाय क्षुन्नाशाय सदा भूवि।
निर्मिता फलकामाय प्रसिद्धा त्वं शंकरप्रिये ।।

अशोक – ॐ स्थिरा भव सदा दुर्गे अशोके शोकहारिणि।
मया त्वं पूजितो दुर्गे स्थिरा भव हरप्रिये ।।

चम्पा – ॐ मानमानेष, वृक्षेषु माननीया सुराऽसुरैः ।
स्नापयामि महादेवि मानं देहि नमोऽस्तु ते ।।

धान - ॐ लक्ष्मि त्वं धान्यरूपासि प्राणिनां प्राणदायिनि।
स्थिरात्यन्तो हि नो भूत्वा गृहे कामप्रदा भव ॥

नदी के जल से स्नान करावें ।

ॐ आत्रेयी भारती गंगा यमुना च सरस्वती ।
सरयू गण्डकी पुण्या श्वेतगंगा च कौशिकी ॥
भोगवती च पाताले स्वर्गे मन्दाकिनी तथा ।
सर्वा सुमनसो भूत्वा भृङ्गारैः स्नापयन्तु ताः ॥

ॐ दुर्गा चण्डीश्वरी चण्डी वाराही कीर्तिका तथा ।
हरसिद्धा तथा काली इन्द्राणी वैष्णवी तथा ॥
भद्रकाली विशालाक्षी भैरवी सर्वरूपिणी ।
एताश्च सर्वयोगिन्यः भृङ्गारैः स्नापयन्तु ताः ॥

ॐ कीर्तिः लक्ष्मीः धृतिर्मेधा तुष्टिः श्रद्धा क्षमापतिः
बुद्धिर्लज्जा वपुः शान्तिः तुष्टिः पुष्टिश्च मातरः ॥
कुरुक्षेत्रं प्रयागश्च वटक्षक्षय - संज्ञकः ।
गोदावरी वियद्गङ्गा नर्मदा मणिकर्णिका ॥

शङ्ख जल से स्नान

ॐ पूर्णस्त्वं शंखपुष्पानां मंगलानाञ्च मंगलम् ।
विष्णुना विधृता नित्यं देवि शान्ति प्रयच्छ मे ॥

गंगाजल से स्नान

मन्दाकिन्यास्तु यद् गंगा सर्वपापहरं शुभम्
स्वर्गं स्रोतस्तु वैष्णव्यं स्नानं भवतु तेन ते ॥

प्रार्थना- ॐ कार्तिकेय महाभाग गौरीहृदयनन्दन ।
कुमार रक्ष मां नित्यं दैत्यान् मम नमोऽस्तु ते ।।
यज्ञकर्ता हाथ में पुष्प लेकर महालक्ष्मी का ध्यान करें-
ध्यान - या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी ।
गम्भीरावर्त्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भैः ।
सा नित्यं पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ।।

ध्यान के बाद यज्ञकर्ता षोडशोपचार से महालक्ष्मी की पूजा करें । पश्चात् हाथ में पुष्प लेकर प्रार्थना करें-

प्रार्थना- धनं धान्यं धरा-धर्म कीर्तिमायुर्यशः श्रियम् ।
तुरगान् दन्तिपुत्रांश्च महालक्ष्मि प्रयच्छ में ।।

यज्ञकर्ता हाथ में पुष्प लेकर सरस्वती का ध्यान करें ।

ध्यान - शारदा शारदाम्भोजवदना वदनाम्बुजे ।
सर्वदा सर्वदाऽस्माकं सन्निधि सन्निधिं क्रियात् ।।

यज्ञकर्ता षोड़शोपचार से महासरस्वती की पूजा करें । पश्चात् पुष्प लेकर प्रार्थना करें ।

प्रार्थना- शुक्लां ब्रह्म - विचारसार - परमामाद्यां जगद्व्यापिनीं,
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां,
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ।।

यज्ञकर्ता सिंह की पञ्चोपचार से पूजा करके हाथ में पुष्प लेकर प्रार्थना करें ।

प्रार्थना- ॐ सिंह त्वं सर्वजन्तूनामधिपोऽसि महाबलः ।
पार्वतीवाहनः श्रीमान् वरं देहि नमोऽस्तु ते ।।

यज्ञकर्ता पञ्चोपचार से महिषासुर की पूजा करके प्रार्थना करें ।

प्रार्थना- ॐ महिषासुरं महावीरं सर्वारिष्टविनाशनम् ।
देविगृहे स्थितोऽहं वरं देहि नमोऽस्तु ते ॥

आचार्य को चाहिए कि यज्ञकर्ता के हाथ में दही, उड़द (दोना में लेकर) बलि दिलावें । यज्ञकर्ता अपनी शक्ति के अनुसार मूल मन्त्र जपें । इसके बाद आरती करें । इति सप्तमी पूजा ।

अथ अष्टमी-पूजनम्

यज्ञकर्ता स्नानादि से निवृत्त होकर शुद्ध वस्त्र धारण कर, आचार्य सहित प्रतिमा पूजागृह में जायँ । आचार्य स्वस्तिवाचन करें । यज्ञकर्ता हाथ में पुष्प, अक्षत, पुंगीफल, द्रव्य और जल लेकर संकल्प करें ।

संकल्प-ॐ तत्सदद्याश्विने मासे शुक्ले पक्षे महाष्टम्यां तिथिमारभ्य महानवमीं यावत् प्रत्यहं अमुकगोत्रः श्रीअमुकदेवशर्म्मा धन-धान्यसुतान्वितपरम-श्रेष्ठप्राप्तिपूर्वकातुलविभूतिचतुर्वर्ग प्राप्तिकामः दुर्गाप्रीतिकामो यथाशक्तिसपरिवाराम् श्रीदुर्गा पूजामहं करिष्ये ।

यज्ञकर्ता पूर्व की तरह भूतशुद्धि, अङ्गन्यास, करन्यास, प्राणायाम इत्यादि करें । पुष्पांजलि दें, बेल की दतुवन दें, उष्ण जल आचमन के लिए दें तथा स्नानादि षोड़शोपचार से पूजा करें । गणेश, पञ्चलोकपाल, दिक्पाल, नवग्रह आदि देवों का, पुनः लक्ष्मी, सरस्वती, कार्तिकेय, सिंह, महिषासुर आदि का षोड़शोपचार या दशोपचार से पूजन करें तथा नव-पत्रिका का भी पूजन करें । यह पूजन पूर्व लिखा जा चुका है ।

अतः अष्टकमलदल की वेदी बनावें, जिसके पूर्वदल में उग्रचण्डा,

रक्तवर्णा, द्विभुजा तथा वर देने वाली भगवती का पूजन करें। नीचे लिखे मन्त्र द्वारा-

ॐ ह्रीं श्रीं उग्रचण्डायै नमः-पंचोपचार से पूजा करें।

प्रार्थना- ॐ उग्रचण्डा तू वरदा मध्याह्नार्कसमप्रभा।
सा मे सदास्तु वरदा तस्यै नित्यं नमो नमः ॥

अग्निकोण के कमलदल में कुंकमवर्ण द्विभुजा सर्वालंकार विभूषित माला धारण करने वाली प्रचण्डा भगवती का पूजन करें। हाथ में पुष्प लेकर प्रार्थना करें-

ॐ ह्रीं श्रीं प्रचण्डायै नमः। पं० से पूजा करें।

प्रार्थना- ॐ प्रचण्डे पुत्रदे नित्यं प्रचण्डे गणसंस्थिते।
सर्वानन्दकरे देवि तुभ्यं नित्यं नमो नमः ॥

ॐ ह्रीं श्रीं चण्डिकायै नमः। पं० से पूजा करें।

दक्षिण कोण में कमलदल में कृष्णवर्ण द्विभुजा सर्वालंकार-भूषित नीलमाला धारण करने वाली चण्डा भगवती का पूजन करें। पञ्चोपचार से पूजा करें। हाथ में पुष्प लेकर प्रार्थना करें।

प्रार्थना- ॐ लक्ष्मीस्त्वं सर्वभूतानां सर्वभूता भयप्रदा।
देवि त्वं सर्वकार्येषु वरदा भव सर्वदा ॥

ॐ ह्रीं श्रीं चण्डीनायिकायै नमः। पं० से पूजा करें।

नैर्ऋत्य कोण के कमलदल में शुक्लवर्ण द्विभुजा श्वेतमुक्ता अलङ्कार से भूषित चण्डनायिका भगवती का पूजन करें। पुष्प लेकर प्रार्थना करें।

प्रार्थना- ॐ या सिद्धिरिति नाम्ना च देवेश-वरदायिनी।
कलिकल्मषनाशाय नमामि चण्डिनायिकाम् ॥

ॐ ह्रीं श्रीं चण्डिकायै नमः । पं० से पूजा करें ।

पश्चिम दिग्भाग के कमलदल में धूम्रवर्ण द्विभुजा शुक्लमाला धारण करने वाली चण्डी भगवती की पच्चोपचार से पूजा करके प्रार्थना करें ।

प्रार्थना- ॐ देवि चण्डिकाम्बिके चण्डे चण्डारि विजयप्रदे ।
धर्मार्थमोक्षदे दुर्गे नित्यं मे वरदा भव ।।

ॐ ह्रीं श्रीं चण्डावतीदेव्यै नमः । पं० से पूजा करें ।

वायव्यकोण के कमलदल में नीलवर्ण द्विभुजा रूढ़ारूढ़ दिव्यालङ्कार से विभूषित, दिव्यमाला धारण करने वाली चण्डावती भगवती की पच्चोपचार से पूजा करके प्रार्थना करें ।

प्रार्थना- ॐ सृष्टि-स्थिति-संहार-गुणत्रय-समन्विताम् ।
या परा परमा शक्तिः चण्डवत्यै नमो नमः ।।

ॐ ह्रीं श्रीं चण्डारूपायै नमः । पं० से पूजा करें ।

उत्तर दिग् भाग में कृष्णवर्ण चतुर्भुज स्वर्णालंकार विभूषित पीतवर्ण माला धारण करने वाली चण्डरूपा भगवती का पच्चोपचार से पूजा करके हाथ में पुष्प लेकर प्रार्थना करें ।

प्रार्थना- ॐ चण्डरूपाम्बिका चण्ड चण्डनायकनायिका ।
सर्वसिद्धिप्रदा देवि तस्यै नित्यं नमो नमः ।।

ॐ ह्रीं श्रीं अतिचण्डादेव्यै नमः । पं० से पूजा करें ।

ईशान कोण के कमलदल में शुक्लवर्ण कोटि सूर्य प्रभावाली रत्नालंकार विभूषित सिंहारूढ़ दशभुजा रक्तमाला धारण करने वाली अतिचण्डा भवगती का पच्चोपचार से पूजा करें ।

प्रार्थना- ॐ बालार्कारुणनयना सर्वदा भक्तवत्सला ।

चण्डासुरस्य मथिनी वरदा त्वतिचण्डिका ।।

पुनः यज्ञकर्ता अष्टदल कमल के पूरब ईशान कोण के मध्य में चतुःषष्टि योगिनी का पञ्चोपचार से पूजा करें ।

ॐ चतुःषष्टियोगिनी-पूजनम्

ॐ ब्रह्माण्यै नमः । चण्डिकायै नमः । रौद्रायै नमः । गौर्य्यै नमः । इन्द्राण्यै नमः । कौमार्य्यै नमः । वैष्णव्यै नमः । दुर्गायै नमः। नारसिंह्यै नमः । कालिकायै नमः । चामुण्डायै नमः । शिवदूत्यै नमः। वाराह्यै नमः । कौशिक्यै नमः । माहेश्वर्यै नमः । शांकर्यै नमः । जयन्त्यै नमः । सर्वमङ्गलायै नमः । काल्यै नमः । कपाल्यै नमः । मेधाव्यै नमः । शिवायै नमः । शाकम्भर्यै नमः । भीमायै नमः । शान्तायै नमः । भ्रामर्य्यै नमः । रुद्राण्यै नमः । अम्बिकायै नमः । क्षमायै नमः । धात्र्यै नमः । स्वाहायै नमः । अपर्णायै नमः । महोदर्य्यै नमः । घोररूपायै नमः । महाकाल्यै नमः । भद्रकाल्यै नमः । भयंकर्य्यै नमः । क्षेमंकर्य्यै नमः । उग्रचण्डायै नमः । चन्द्रोग्रायै नमः । चण्डिनायिकायै नमः । चण्डायै नमः । चण्डवत्यै नमः । चण्ड्यै नमः। महामोहायै नमः । प्रियंकर्य्यै नमः । बलविकार्यै नमः । बलप्रमथिन्यै नमः । मनोन्मथिन्यै नमः । सर्वभूतदामिन्यै नमः । उमायै नमः । तारायै नमः । महानिद्रायै नमः । विजयायै नमः । जयायै

नमः। शैलपुत्र्यै नमः । चण्डघण्टायै नमः । स्कन्दमात्रे नमः । कालरात्र्यै नमः । चण्डिकायै नमः । कुष्माण्ड्यै नमः । कात्यायिन्यै नमः । महागौर्यै नमः । ॐ ह्रीं कोटयोगिनीभ्यो नमः । नानादेशवासिनीभ्यो योगिनीभ्यो नमः ।

पूजनोपरांत यज्ञकर्ता हाथ में पुष्प लेकर नीचे लिखे मंत्र से प्रार्थना करें -

प्रार्थना- ब्राह्मीहंससमारूढां स्वर्णवर्णचतुर्भुजाम् ।
चतुर्वक्त्रां त्रिनेत्राश्च ब्रह्मकूर्चं च पंकजम् ।।
प्रदद्यात् सूत्रश्च दधतीं चारुहंसासिनीं तथा ।
जटाजूटधरां देवीं भावयेत्साधकोत्तमः ।।

आवाहयाम्यहं देवि योगिनीः परमेश्वरीः ।
योगाभ्यासेन सन्तुष्टाः परध्यानसमन्विताः ।।
चतुःषष्टिसमाख्याता योगिन्यो हि वरप्रदाः ।
ॐ चतुःषष्टियोगिनीमातृकाभ्यो नमः ।

अथ अस्त्रपूजनम्

ॐ त्रिशूलाय नमः । कहकर पञ्चोपचार से पूजा करें ।

प्रार्थना- ॐ सर्वायुधानां प्रथमो निर्मितस्त्वं पिनाकिना ।
शूलात् सारं समाकृष्य कृत्वा मुष्टिग्रहं शुभम् ।।

ॐ खड्गाय नमः । कहकर पञ्चोपचार से पूजा करें ।

प्रार्थना- ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगमो विजयश्चैव धर्मपाल नमोऽस्तु ते ।।
ॐ चक्राय नमः । कहकर पञ्चोपचार से पूजा करें ।
प्रार्थना- चक्रे त्वं विष्णुरुपोऽसि विष्णुपाणौ सदा स्थितः।
देविहस्तस्थितो नित्यं सुदर्शन नमोऽस्तु ते ।।
ॐ शक्त्यै नमः । कहकर पञ्चोपचार से पूजा करें ।
प्रार्थना- ॐ शक्तिस्त्वं सर्वदेवानां गुरोरस्य विशेषतः।
शक्तिरुपेण सर्वत्र रक्षां कुरु नमोऽस्तु ते ।।
ॐ खेटकाय नमः। कहकर पञ्चोपचार से पूजा करें ।
प्रार्थना- ॐ यष्टिरूपेण खेट त्वं वैरिसंहारकारक ।
देविहस्तस्थितो नित्यं मम रक्षां कुरुष्व च ।।
ॐ पूर्णचापाय नमः । कहकर पञ्चोपचार से पूजा करें ।
प्रार्थना- ॐ सर्वायुधमहामात्र सर्वदेवारिसूदन ।
चाप मां सर्वतो रक्ष साकं सायकसंयुतैः ।।
ॐ नागपाशाय नमः । कहकर पञ्चोपचार से पूजा करें ।
प्रार्थना- ॐ पाशस्त्वं नागरूपोऽसि विषपूर्णो वृषोदरे ।
शत्रूणां दुस्सहो नित्यं नागपाशो नमोऽस्तु ते ।।
ॐ अंकुश्यै नमः । कहकर पञ्चोपचार से पूजा करें ।
प्रार्थना- अंकुशोऽसि नमस्तुभ्यं गजानां नियमः सदा ।
लोकानां सर्वरक्षार्थं विधृतः पार्वतीकरे ।।
ॐ घंटाये नमः । कहकर पञ्चोपचार से पूजा करें ।

प्रार्थना- ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्यया जगत् ।
सा घण्टा पातु नो देवि पापेभ्या नः सुतानिव ।।
ॐ परसवे नमः । कहकर पञ्चोपचार से पूजा करें ।

प्रार्थना- ॐ परसो त्वं महातीक्ष्ण सर्वदेवारिसूदन ।
देविहस्तस्थितो नित्यं शत्रुक्षय नमोऽस्तु ते ।।

अथ सन्धिपूजनम्

(अष्टमी-नवमी के समय)

यज्ञकर्ता पूर्व की तरह आसन-शुद्धि, पुष्प-शुद्धि, करशुद्धि, प्राणायाम करें । आचार्य स्वस्तिवाचन करें । गणेश आदि का पूजन करें । इसके बाद चामुण्डा भगवती की पूजा करें ।

ध्यान- ॐ काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ।।

ॐ ह्रीं श्रीं चामुण्डायै नमः-पञ्चोपचार या दशोपचार या षोड़शोपचार से पूजा करें । चतुःषष्टि योगिनी की पूजा करें । पूर्व की तरह बलि दें । १०८ घी के दीये जलावें, जिसका संकल्प लिखा जा रहा है ।

संकल्प-ॐ तत्सत् आश्विने मासि कन्याराशौ सवितरि शुक्लपक्षे अमुकगोत्रः श्रीअमुकशर्मा सदारापत्य-समातृकः सपरिवार एतद्दीपसमसंख्यकबाजपेयक्रतुजन्यफलसमफलप्राप्तिपूर्वकं चामुण्डाप्रीतिकामः एतान् अष्टोत्तरशतसंख्यकान् जाज्वल्यमानान् घृतप्रदीपान् अग्निदैवतान् भगवत्यै चामुण्डायै रूपायै दुर्गायै सम्प्रददे ।

ब्राह्मणों को दक्षिणा देकर प्रणाम करें ।

अथ नवमी–पूजनम्

नवमी की पूजा अष्टमी की तरह करें । केवल सन्धि-पूजा नहीं करनी है और सभी पूजा अष्टमी की तरह करें । कहीं बलि भी दी जाती है ।

कूष्माण्ड बलि (का० पु०)

ब्राह्मणेन सदा देया कूष्माण्डबलिकर्मणि ।
वस्त्रे संवेष्टितं कृत्वां छेदं नैव तु कारयेत् ।।
क्षत्रियो वैश्यादिकस्तु छेदयेत् छुरिकादिना ।
एवं शास्त्रसम्मतेऽपि कृत्वा कार्यं विदुर्बुधाः ।।

ब्राह्मण कूष्माण्ड में वस्त्र लपेट कर छोड़ दें । अस्त्र से खण्डन न करें । क्षत्रिय, वैश्य, शूद्र आदि खण्डन करें, यह शास्त्रसम्मत है । कितनी जगह नारियल तथा केतारि ईख की बलि देते हैं । प्रथम अस्त्र पूजन करें ।

अस्त्र–पूजनम्

ॐ खड्गाय नमः । कहकर पच्चोपचार से पूजा करें । इसके बाद प्रार्थना करें ।

प्रार्थना- असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ।
श्रीगमो विजयश्चैव धर्मपाल नमोऽस्तु ते ।।

असि (तलवार) की पूजा करने के बाद ही उक्त बलि-पदार्थ को खण्डन करें ।

अथ दशमी–पूजनम्

नित्य-क्रिया से निवृत्त होकर यज्ञकर्ता पूजा-स्थान में जायँ । पूर्व की तरह भूतशुद्धि आदि कार्य करें । गणेश, नवग्रह, दिक्पाल, दुर्गा, लक्ष्मी, सरस्वती, कार्तिक इत्यादि देवों का पूजन करें, जैसा कि अष्टमी, पूजा में लिखा जा चुका है । इसके बाद यथाशक्ति हवन करें । तदनन्तर आरती करें।

आरती

आरती श्री आरत हरिणी की । दुष्ट दलन अद्भुत करनी की ।। टेक ।।
अष्टभुजी भू-जन हित आयो । कंस ध्वंस करि विन्ध्य छायो ।।
पुनि दुर्गा काली कहलायो । रक्तबीज बली असुर खपायो ।।
भार अपार घटै धरणी की ।। आरती० ।।

कर खटवाङ्ग खड्ग बरु राजे । पीत पुनीत उपरना साजे ।।
घन घन घंटा की ध्वनि बाजे । घोर शोर सुनि निशिचर भाजैं ।।
सुमुखि सरदचन्द्र वदनी की ।। आरती० ।।

शुम्भ-निशुम्भ असुर दल मारे । मधुकैटभ दानव संहारे ।।
अनावृष्टि बरु लोग निहारै । लोकवेद जय जयति उच्चारै ।।
आदिशक्ति अवढरढरनी की ।। आरती० ।।

जाको यश इन्द्रादिक गावैं । सुनि धुनि गुण भक्तन जन भावै ।।
करतल ध्वनि करि शोर मचावै । घृत तुल बाति कपूर जलावै ।।
जटाजूट शंकरहरनी की ।। आरती० ।।

जयति जयति जय भक्त पुकारै । तब तुम आय भक्त दुख टारै ।।
जो कोई यह आरती नर गावै ।। "दुर्गा" सो वांछित फल पावै ।।
रामप्रिया रघुवरघरनी की ।। आरती० ।।

प्रार्थना - प्रचण्डे पुत्रदे नित्यं सुप्रीते सुरनायिके ।
कुलद्योतकरे देवि जयं देहि नमोऽस्तु ते ।।
आयुर्देहि यशो देहि भाग्यं भगवति देहि मे ।
पुत्रान् देहि धनं सर्वं कामं च देहि मे ।।

नोट- शिवागारे झल्लकं च सुर्य्यागारे तु शंखनम् ।
दुर्गागारे वंशीवाद्यं मधुरी च न वादयेत् ।।
(योगिनी तन्त्र)

योगिनी तन्त्र में लिखा है कि शिव के मन्दिर में करताल व सूर्य मन्दिर में शंख और दुर्गाजी के मन्दिर में वंशी नहीं बजाना चाहिए ।

प्रदक्षिणा- नमस्ते देवि देवेशि नमस्ते ईप्सितप्रदे ।
नमस्ते जगतां धात्रि नमस्ते भक्तवत्सले ।।

क्षमा-प्रार्थना

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ।।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ।।

विसर्जनम्

इमां पूजां मया देवि यथाशक्त्योपपादितम् ।
रक्षार्थं त्वं समादाय व्रजस्थानमनुत्तमम् ।।

यज्ञकर्ता दाहिने हाथ से अक्षत लेकर बायें हाथ में रखें और दाहिने हाथ से थोड़ा-थोड़ा पूजित देवी-देवताओं पर छिड़कते जायँ। आचार्य नीचे मन्त्र पढ़ते रहें ।

ॐ उत्तिष्ठ देवि चामुण्डे शुभां पूजां प्रगृह्य च ।
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ।
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चण्डिके ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ।
व्रज त्वं स्रोतसि जले गृहे तिष्ठ विभूतये ।
सम्वत्सरव्यतीते तु पुनरागमनाय च ।।

ॐ दुर्गे देवि जगन्मातः स्वस्थानं गच्छ चण्डिके ।
इमां पूजां मया देवि यथाशक्ति निवेदिताम् ।।
रक्षणार्थं समादाय व्रजस्व स्थानमुत्तमम् ।
सिंहवाहिनी चामुण्डे पिनाकधर वल्लभे ।।
गच्छ देवि महामाये कल्याणं कुरु मे सदा ।
यथाशक्त्या कृता पूजा भक्त्या कमललोचने ।।
गच्छन्तु देवताः सर्वे दत्वा मे वरमीप्सितम् ।
त्वं गच्छ परमेशानि सुखं सर्वत्र गणैः सह ।।

यज्ञकर्ता को पूजित देव आसन को दाहिने हाथ से स्पर्श (हिला दे) करना चाहिए । आचार्य और अन्य ब्राह्मण को दक्षिणा दें । आचार्य पूजित कलश के जल से यज्ञकर्ता के मस्तक पर जल छींटें। आचार्य अभिषेक मंत्र पढ़ें ।

अभिषेक

गणाधियोऽर्कशशीधरासुतो बुधो गुरुर्भार्गवसूर्य्यनन्दनः । राहुश्च केतुश्च परं नवग्रहाः कुर्वन्तु वः पूर्णमनोरथं सदा ।। उपेन्द्र इन्द्रो वरुणो हुताशनस्त्रिविक्रमो भानुसखश्चतुर्भुजः । गन्धर्वयक्षोरग-सिद्धचारणाः कुर्वन्तु वः पू० ।। नलो दधीचिः सगरः पुरूरवाः शाकुन्तलेयो भरतो धनंजयः । रामत्रयः वैन्यबली युधिष्ठिरः कुर्वन्तु वःपू० ।। मनुर्मरीचिर्भृगुदक्षनारदाः पराशरो व्यासवशिष्ठभार्गवाः । वाल्मीकिकुम्भोद्भवगर्गगौतमाः कुर्वन्तु वःपू० । रम्भा शची सत्यवती च देवकी गौरी च लक्ष्मीश्च दितिश्च रुक्मिणीः । कूर्मो गजेन्द्रः सचराचरा श्च

कुर्वन्तु वःपू० ।। गंगा च क्षिप्रा यमुना सरस्वती गोदावरी वेत्रवती च नर्मदा । सा चन्द्रभागा वरुणा त्वसौ नदी कुर्वन्तु वः पूर्णमनोरथं सदा।। तुंगप्रभासो गुरुचक्रपुष्करं गया विमुक्तो बदरी बटेश्वरः । केदार-पम्पासरसश्च नैमिषं कुर्वन्तु वःपू० ।। शङ्खश्च दूर्वासित-पत्रचामरं मणिप्रदीपो वररत्नकाञ्चनम् । सम्पूर्णकुम्भः सुहुतो हुताशनः कुर्वन्तु वःपू० ।। प्रयाणकाले यदि वा सुमङ्गले प्रभातकाले च नृपाभिषेचने । धर्मार्थकामाय जयाय भाषितं व्यासेन कुर्वन्तु मनोरथंहि तत् ।।

प्रार्थना - आयुर्देहि यशो देहि भाग्यं भगवति देहि मे ।
पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे ।।
ॐ प्रचण्डे पुत्रदे नित्यं सुप्रीते सुरनायिके ।
कुलद्योतकरे देवि जयं देहि नमोऽस्तु ते ।।
ॐ रुण्डचण्डे प्रचण्डे त्वं प्रचण्डबलनाशिनी ।
रक्षा मां सर्वतो देवि जय देवि नमोऽस्तु ते ।।

इति दुर्गा-शारदीयपूजा-पद्धतिः समाप्ता ।